# शिवोपासन मन्त्राः

## *śivopāsana mantrāḥ*

निध॑नपतये॒ नमः। निध॑नपतान्तिकाय॒ नमः।

*nidha̍napataye̱ namaḥ / nidha̍napatāntikāya̱ namaḥ /*

ऊर्ध्वाय॒ नमः। ऊर्ध्वलिङ्गाय॒ नमः।

*ūrdhvāya̱ namaḥ / ūrdhvaliṅgāya̱ namaḥ /*

हिरण्याय॒ नमः। हिरण्यलिङ्गाय॒ नमः।

*hiraṇyāya̱ namaḥ / hiraṇyaliṅgāya̱ namaḥ /*

सुवर्णाय॒ नमः। सुवर्णलिङ्गाय॒ नमः।

*suvarṇāya̱ namaḥ / suvarṇaliṅgāya̱ namaḥ /*

दिव्याय॒ नमः। दिव्यलिङ्गाय॒ नमः।

*divyāya̱ namaḥ / divyaliṅgāya̱ namaḥ /*

भवाय॒ नमः। भवलिङ्गाय॒ नमः।

*bhavāya̱ namaḥ / bhavaliṅgāya̱ namaḥ /*

शर्वाय॒ नमः। शर्वलिङ्गाय॒ नमः।

*śarvāya̱ namaḥ / śarvaliṅgāya̱ namaḥ /*

शिवाय॒ नमः। शिवलिङ्गाय॒ नमः।

*śivāya̱ namaḥ / śivaliṅgāya̱ namaḥ /*

ज्वलाय॒ नमः। ज्वललिङ्गाय॒ नमः।

*jvalāya̱ namaḥ / jvalaliṅgāya̱ namaḥ /*

आत्माय॒ नमः। आत्मलिङ्गाय॒ नमः।

*ātmāya̱ namaḥ / ātmaliṅgāya̱ namaḥ /*

परमाय॒ नमः। परमलिङ्गाय॒ नमः।

*paramāya̱ namaḥ / paramaliṅgāya̱ namaḥ /*

एतथ्सोमस्य॑ सूर्य॒स्य॒ सर्व॑लिङ्गग्ग्ं स्थाप॒य॒ति॒ पाणिमन्त्रं॑ पवि॒त्रम् ॥

*etathsomasya̍ sūrya̱sya̱ sarvaliṅgagġ sthāpa̱ya̱ti̱ pāṇimantra̍ṁ pavi̱tram //*

स॒द्योजा॒तं प्र॑पद्या॒मि॒ स॒द्योजा॒ताय॒ वै नमो॒ नम॑ः।

*sa̱dyojā̱taṁ pra̍padyā̱mi̱ sa̱dyojā̱tāya̱ vai namo̱ nama̍ḥ /*

भ॒वे भ॑वे॒ नाति॑भवे भवस्व॒ माम्। भ॒वोद्भ॑वाय॒ नम॑ः॥

*bha̱ve bha̍ve̱ nāti̍bhave bhavasva̱ mām / bha̱vodbha̍vāya̱ nama̍ḥ //*

वा॒म॒दे॒वाय॒ नमो᳚ ज्ये॒ष्ठाय॒ नम॑श्श्रे॒ष्ठाय॒ नमो॑ रु॒द्राय॒ नम॒ः काला॑य॒

*vā̱ma̱de̱vāya̱ namo̎ jye̱ṣṭhāya̱ nama̍ḥ śre̱ṣṭhāya̱ namo̍ ru̱drāya̱ nama̱ḥ kālā̍ya̱*

नम॒ः कल॑विकरणाय॒ नमो॒ बल॑विकरणाय॒ नमो॒ बला॑य॒ नमो॒ बल॑प्रमथनाय॒

*nama̱ḥ kala̍vikaraṇāya̱ namo̱ bala̍vikaraṇāya̱ namo̱ balā̍ya̱ namo̱ bala̍pramathanāya̱*

नम॒स्सर्व॑भूतदमनाय॒ नमो॑ म॒नोन्म॑नाय॒ नम॑ः॥

*nama̱ḥ sarva̍bhūtadamanāya̱ namo̍ ma̱nonma̍nāya̱ nama̍ḥ //*

अ॒घोरे᳚भ्योऽथ॒ घोरे᳚भ्यो॒ घोर॒घोर॑तरेभ्यः।

*a̱ghore̎bhyo'tha̱ ghore̎bhyo̱ ghora̱ghora̍tarebhyaḥ /*

सर्वे᳚भ्यस्सर्व॒शर्वे᳚भ्यो॒ नम॑स्ते अस्तु रु॒द्ररू॑पेभ्यः॥

*sarve̎bhyaḥ sarva̱śarve̎bhyo̱ nama̍ste astu ru̱drarū̍pebhyaḥ //*

तत्पुरु॑षाय वि॒द्महे॑ महादे॒वाय॑ धीमहि । तन्नो॑ रुद्रः प्रचो॒दया᳚त् ॥

*tatpuru̍ṣāya vi̱dmahe̍ mahāde̱vāya̍ dhīmahi / tanno̍ rudraḥ praco̱dayā̎t //*

ईशानस्सर्व॑विद्या॒ना॒मीश्वरस्सर्व॑भूता॒ना॒ं

*īśānaḥ sarva̍vidyā̱nā̱mīśvaraḥ sarva̍bhūtā̱nā̱m̐*

ब्रह्माधि॑पति॒र्ब्रह्म॒णोऽधि॑पति॒र्ब्रह्मा॑ शि॒वो मे॑ अस्तु सदाशि॒वोम् ॥

*brahmā'dhi̍pati̱r-brahma̱ṇodhi̍pati̱r-brahmā̍ śi̱vo me̍ astu sadāśi̱vom //*

नमो हिरण्यबाहवे हिरण्यवर्णाय हिरण्यरूपाय हिरण्यपतयेऽम्बिकापतय

*namo hiraṇyabāhave hiraṇyavarṇāya hiraṇyarūpāya hiraṇyapataye'mbikāpataya*

उमापतये पशुपतये॑ नमो॒ नमः॑ ॥

*umāpataye paśupataye̍ namo̱ nama̍ḥ //*

ऋ॒तग्ं स॒त्यं प॑रं ब्र॒ह्म॒ पु॒रुषं॑ कृष्ण॒पिङ्ग॑लम् ।

*ṛ̱tagm̐ sa̱tyam̐ pa̍ram̐ bra̱hma̱ pu̱ruṣa̍m̐ kṛṣṇa̱piṅga̍lam /*

ऊ॒र्ध्वरे॑तं वि॑रूपा॒क्ष॒ं वि॒श्वरू॑पाय॒ वै नमो॒ नमः॑ ॥

*ū̱rdhvare̍tam̐ vi̍rūpā̱kṣa̱m̐ vi̱śvarū̍pāya̱ vai namo̱ nama̍ḥ //*

सर्वो॒ वै रु॒द्रस्तस्मै॑ रु॒द्राय॒ नमो॑ अस्तु ।

*sarvo̱ vai ru̱drastasmai̍ ru̱drāya̱ namo̍ astu /*

पुरु॑षो॒ वै रु॒द्रस्सन्म॒हो नमो॒ नमः॑ ।

*puru̍ṣo̱ vai ru̱draḥ sanma̱ho namo̱ nama̍ḥ /*

विश्वं॑ भू॒तं भुव॑नं चि॒त्रं ब॑हु॒धा जा॒तं जाय॑मानं च॒ यत् ।

*viśva̍m̐ bhū̱tam̐ bhuva̍nam̐ ci̱tram̐ ba̍hu̱dhā jā̱tam̐ jāya̍mānam̐ ca̱ yat /*

सर्वो॒ ह्ये॑ष रु॒द्रस्तस्मै॑ रु॒द्राय॒ नमो॑ अस्तु ॥

*sarvo̱ hye̍ṣa ru̱drastasmai̍ ru̱drāya̱ namo̍ astu //*

कद्रु॒द्राय॒ प्रचे॑तसे मी॒ढुष्ट॑माय॒ तव्य॑से ।

*kadru̱drāya̱ prace̍tase mī̱ḍhuṣṭa̍māya̱ tavya̍se /*

वो॒ चेम॒ शन्त॑मगं॒ हृ॒दे ।

*vo̱ cema̱ śanta̍magṁ hṛ̱de /*

सर्वो॒ ह्ये॑ष रु॒द्रस्तस्मै॑ रु॒द्राय॒ नमो॑ अस्तु ॥

*sarvo̱ hye̍ṣa ru̱drastasmai̍ ru̱drāya̱ namo̍ astu //*